# Shri Ganesha Namashtaka Stotram

# श्रीगणेशनामाष्टकस्तोत्रम्

## Document Information

Text title : gaNeshanAmAShTakastotram from Brahmanda Purana 2.42

File name : gaNeshanAmAShTakastotram.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Proofread by : NA

Description/comments : Brahmanda Purana Verses 2.42.28 through 2.42.44

Latest update : August 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीगणेशनामाष्टकस्तोत्रम्

श्रीकृष्ण उवाच -
श्रुणु देवि महाभागे वेदोक्तं वचनं मम ।
यच्छ्रुत्वा हर्षिता नूनं भविष्यसि न संशयः ।
विनायकस्ते तनयो महात्मा महतां महान् ॥

यं कामः क्रोध उद्वेगो भयं नाविशते कदा ।
वेदस्मृतिपुराणेषु संहितासु च भामिनि ॥

नामान्यस्योपदिष्टानि सुपुण्यानि महात्मभिः ।
यानि तानि प्रवक्ष्यामि निखिलाघहराणि च ॥

प्रमथानां गणा ये च नानारूपा महाबलाः ।
तेषामीशस्त्वयं यस्माद्गणेशस्तेन कीर्त्तितः ॥ १॥ गणेशः

भूतानि च भविष्याणि वर्तमानानि यानि च ।
ब्रह्माण्डान्यखिलान्येव यस्मिंल्लम्बोदरः स तु ॥ २॥ लम्बोदरः

यः शिरो देवयोगेन छिन्नं संयोजितं पुनः ।
गजस्य शिरसा देवि तेन प्रोक्तो गजाननः ॥ ३॥ गजानन

चतुर्थ्यामुदितश्चन्द्रो दर्भिणा शप्त आतुरः ।
अनेन विधृतो भाले भालचन्द्रस्ततः स्मृतः ॥ ४॥ ततोऽभवत् भालचन्द्रः

शप्तः पुरा सप्तभिस्तु मुनिभिः सङ्क्षयं गतः ।
जातवेदा दीपितोऽभूद्येनासौ शूर्पकर्णकः ॥ ५॥ शूर्पकर्णः

पुरा देवासुरे युद्धे पूजितो दिविषद्गणैः ।
विघ्नं निवारयामास विघ्ननाशस्ततः स्मृतः ॥ ६॥ विघ्ननाशः

अद्यायं देवि रामेण कुठारेण निपात्य च ।
दशनं दैवतो भद्रे ह्येकदन्तः कृतोऽमुना ॥ ७॥ एकदन्तः

भविष्यत्यथ पर्याये ब्रह्मणो हरवल्लभः ।
वक्रीभविष्यत्तुण्डत्वाद्वक्रतुण्डः स्मृतो बुधैः ॥ ८॥ वक्रतुण्डः

एवं तवास्य पुत्रस्य सन्ति नामानि पार्वती ।
स्मरणात्पापहारीणि त्रिकालानुगतान्यपि ॥ ९॥

अस्मात्त्रयोदशीकल्पात्पूर्वस्मिन्दशमीभवे ।
मयास्मै तु वरो दत्तः सर्गदेवाग्रपूजने ॥ १०॥

जातकर्मादिसंस्कारे गर्भाधानादिकेऽपि च ।
यात्रायां च वणिज्यादौ युद्धे देवार्चने शुभे ॥ ११॥

सङ्कष्टे काम्यसिद्ध्यर्थं पूजयेद्यो गजाननम् ।
तस्य सर्वाणि कार्याणि सिद्ध्यन्त्येव न संशयः ॥ १२॥

इति श्रीब्रह्माण्डे महापुराणे वायुप्रोक्ते मध्यभागे तृतीय
उपोद्घातपादे भार्गवचरिते द्विचत्वारिंशत्तमोऽध्यायान्तर्गतं
श्रीकृष्णप्रोक्तं श्रीगणेशनामाष्टकस्तोत्रं सम्पूर्णम् ॥ ४२॥

From Brahmanda Purana Verses 2.42.28 through 2.42.44

NA

*Shri Ganesha Namashtaka Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*